देवहूयं देवह्वानं प्रति देवा आगच्छन्ति आगताश्च ते स्वसम्बद्धे कर्मणि एनमवन्ति" भा०

**देवहेडन** न० हेड–भावे ल्युट् ६त०। लस्य डः। देवानामवहेलनरूपे अपराधे "यद्देवा देवहेडनं देवासश्चकृमा वयम्" यजु० २०।१४

**देवहोत्र** पु० त्रयोदशे मन्वन्तरे योगेश्वररूपस्य हरेरंशस्य पितरि। त्रयोदशमनूपक्रमे "देवहोत्रस्य तनय उपहर्त्ता दिवस्पतेः। योगेश्वरो हरेरंशो बृहत्यां संभविष्यति" भाग० ८।१३।१४

**देवह्रद** पु० श्रीपर्वतस्थे तीर्थभेदे "श्रीपर्वते महादेवो देव्या सह महाद्युतिः। न्यवसत् परमप्रीतो ब्रह्मा च त्रिदशैः सह। तत्र देवह्रदे स्नात्वा शुचिः प्रयतमानसः। अश्वमेधमवाप्नोति परां सिद्धिञ्च गच्छति" भा० व० ८५अ०। [गतौञ्च शब्दच०।

**देवा** स्त्री दिव–अच्। १पद्मचारिण्यां लतायाम् २असनप-

**देवाक्रीड़** पु० देवा आक्रीड़न्त्यत्र आ+क्रीड–आधारे घञ् ६त०। १देवोद्याने इन्द्रारामे "देवराजाभ्यनुज्ञातो रत्नैश्च प्रतिपूजितः। वैनतेयं समारुह्य सहितः सत्यभामया। देवाक्रीड़ं परिक्रामन् पूज्यमानः सुरर्षिभिः। स ददर्श महाबाहुराक्रीडं वासवस्य च" हरिवं० १२३अ०

**देवागारिक** त्रि० देवागारे नियुक्तः अगारान्तत्वात् ठन्। देवागारे परिचरणार्थं नियुक्ते।

**देवाची** स्त्री देवानञ्चति वेदे बा०नलोपः नाद्र्यादेशश्च ङीप्। १देवान् प्रति गन्त्र्यां २देवानां पूजिकायां च "देवान् प्रत्यक्तया कृपेति" यास्कोक्तेः देवान् प्रत्यक्ततया सामर्थ्यलक्षणायां २कृपायाञ्च "य ऊर्ध्वया स्वध्वरो देवाच्या कृपा" ऋ०१। १२७।१ "कृपा कृपयेति" भा०

**देवाजीव** त्रि० देवं देवप्रतिमाद्रव्यमाजीवति जीव–अण् उपस०। (पूजारी) देवले। णिनि देवाजीवोऽप्यत्र।

**देवाट** त्रि० देवा अटन्त्यत्र अट–आधारे घञ्। देवगत्याधारे पाटलिपुत्रादुत्तरस्यां गङ्गापारे वर्त्तमाने १हरिहरक्षेत्रे "यदा नन्दी शूलपाणिर्गोधनेन पुरस्कृतः। स्थितवान् तद्दिनाद्देव क्षेत्रं हरिहरात्मकम्। देवानामटनाच्चैव देवाट इति संज्ञितम्" वराहपु०। देवानटन्ति अट–अण् उप०स०। देवान् प्रति २गन्तरि त्रि०।

**देवातिथि** पु० पौरवन्नृपभेदे "ततश्चाक्रोधनस्तस्माद्देवातिथिरमूत्नृपः" भाग० ६।२२।८

**देवातिदेव** पु० देवानतिक्रम्य दीव्यति अति+दिव–अच्। विष्णौ "देवातिदेवो भगवान् प्रसूतिरंशे हरिर्यस्य जगत्प्रणेता" हरिवं० १५४अ०।

**देवात्मन्** पु० देव आत्मा यस्य। १अश्वत्थवृक्षे अश्वत्थशब्दे दृश्यम् कर्म०। २देवस्वरूपे च।

**देवाधिदेव** पु० देवानामधिदेवः। १सर्वेश्वरे परमेश्वरे २महादेवे च ३जिनदेवभेदे हेमच०।

**देवाधिप** पु०देवानामप्यधिपः। १सर्वनियन्तरि परमेश्वरे २द्वापरयुगीयनृपभेदे स च निकुम्भासुरांशात् द्वापरे भूमाववततार यथाह भा०आ०६७अ०"निकुम्भादजितः संख्ये महामतिरजायत। भूमौ भूमिपतिश्रेष्ठो देवाधिप इति स्मृतः"। ३इन्द्रे च "वलिं बद्धा महादैत्यं शक्रो देवाधिपः कृतः" भा०७० ६अ०

**देवानांप्रिय** त्रि० ६त०। "देवानां प्रिय इति च मूर्खे" वा० अलुक्स०। १मूर्खे "पशवो हि देवानां प्रीतिं जनयन्ति इति तेषां प्रियास्तथा च तत्प्रियत्वेन पशुतुल्यता प्रतीयते इत्यतः पशुवन्मूर्ख इति तदर्थः" तत्त्वबो०। २छागे पुंस्त्री त्रिका०।

**देवानीक** पु० सावर्णस्य तृतीयमनोः पुत्रभेदे "संवर्त्तनः सुशर्मा च देवानीकः पुरूद्वहः" हरिवं०७अ० तत्पुत्रोक्तौ। सगरवंश्ये २नृपभेदे च "क्षेमधन्वसुतस्त्वासीत् देवानीकः प्रतापवान्" हरिवं० १५अ०। ६त०। ३देवानां सैन्ये न० "उग्रं तच्च महानादं देवानीकं महाप्रभम्" भा०व० २२६अ०।

**देवानुक्रम** पु०वैदिकमन्त्राणां देवताज्ञापनायानुक्रमो यत्र। वैदिकमन्त्राणां देवताज्ञापके ग्रन्थभेदे। सामान्यतः छन्दोविशेषाणां देवताभेदाः सर्वानुक्रमणिकायामुक्ताः तच्च देवताशब्दे ३६८२ पृ० "गायत्र्या अग्निरुष्णिहः सवितेत्यादि" वाक्यम् दर्शितम्।

**देवानुचर** त्रि० देवाननुचरति अनु+चर–ट। १देवपश्चाद्गामिनि विद्याधरादौ उपदेवे "निशम्य देवानुचरस्य वाचं मनुष्यदेवः पुनरप्युवाच" रघुः। देवानुयायिन्देवानुग प्रभृतयोऽप्यत्र।

**देवान्तक** पु० ६त०। १राक्षसभेदे २दैत्यभेदे च।

**देवान्धस्** न० देवानामन्ध इव दर्शनेन प्रीतिकरम्। १अमृते हेमच० देवान्नादयोऽप्यत्र। देवयोग्यमन्धः। २देवनैवेद्यार्थे ३कल्पितेऽन्ने च "अनुपाकृतमांसानि देवान्नानि हवींषि च" मनुः।

**देवापि** पु० पौरवे प्रतीपराजपुत्रे नृपभेदे "प्रतीपस्य